# Shri Varadanarayana Prarthana

# श्रीवरदनारायण प्रार्थना

## Document Information

Text title : Varadanarayana Prarthana

File name : varadanArAyaNaprArthanA.itx

Category : vishhnu, varadAnanda

Location : doc_vishhnu

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Description/comments : Vishnu Sahasranama, last page. See derived 108 nAmAvalI

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : April 23, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2023

*sanskritdocuments.org*

# श्रीवरदनारायण प्रार्थना

पद्मासनाय मणिकुण्डल शोभिताय
भास्वज्जटामुकुटमण्डितमस्तकाय ।
लक्ष्मीवराय जनपालन तत्पराय
नारायणाय बदरीपतये नमोऽस्तु ॥ १॥

ध्यानस्थिताय सरसीरुहलोचनाय
विद्युत्प्रभायुतपयोधरसन्निभाय ।
मन्दस्मितेन्दुवदनाय चतुर्भुजाय
नारायणाय बदरीपतये नमोऽस्तु ॥ २॥

सर्वाय तापशमनाय नतप्रियाय
भव्याय भूतजनकाय सुरोत्तमाय ।
शर्वाय सर्वदमनाय मनोहराय
नारायणाय बदरीपतये नमोऽस्तु ॥ ३॥

व्यासोद्धवादिवरदाय दयामयाय
ब्रह्मात्मजप्रमुखसन्मुनिसंस्तुताय ।
श्रीशङ्करेण पुनराहितविग्रहाय
नारायणाय बदरीपतये नमोऽस्तु ॥ ४॥

लक्ष्मीसुपर्णधनदार्जुनसेविताय
सूर्यार्चिताय मरुतात्मजवन्दिताय ।
भक्तार्चिषे नरसखाय सुखप्रदाय
नारायणाय बदरीपतये नमोऽस्तु ॥ ५॥

नन्दप्रियाय कपिलाय सनातनाय
दक्षाय नैकसुखदाय गदाग्रजाय ।
श्रीविठ्ठलाय हिमशैलवरे स्थिताय
नारायणाय बदरीपतये नमोऽस्तु ॥ ६॥

गोविन्द माधव मुकुन्द नितान्तकान्त-
नामप्रियाय सुलभाय कृपाघनाय ।
सत्याय भक्तहितबोधपरायणाय
नारायणाय बदरीपतये नमोऽस्तु ॥ ७॥

नित्याय सर्वगतये जगदीश्वराय
मूर्ताय यज्ञपतये निरुपाधिकाय ।
देवाय वेदमतयेऽमितविक्रमाय
नारायणाय बदरीपतये नमोऽस्तु ॥ ८॥

गोपाय वीरविजयाय धराधराय
बीजाय सुव्रतकराय महाधनाय ।
ईज्याय लोकगुरवे गरुडध्वजाय
नारायणाय बदरीपतये नमोऽस्तु ॥ ९॥

कौमोदकीदरसुदर्शननन्दकादि-
दिव्यायुधप्रहरणाय महाक्रमाय ।
त्रैलोक्यमङ्गलकराय रमेश्वराय
नारायणाय बदरीपतये नमोऽस्तु ॥ १०॥

रामाय सत्यतरधर्मविदुत्तमाय
प्राणाय बुद्धिकरणाय शुभेक्षणाय ।
शुद्धात्मने करणकार्यकृतेऽव्ययाय
नारायणाय बदरीपतये नमोऽस्तु ॥ ११॥

प्रेम्णास्वभक्तजनवाञ्छितपूरणाय
सन्दर्शितात्मवपुषे नतवत्सलाय ।
स्निग्धप्रसन्नहसिताय हितोत्तमाय
नारायणाय बदरीपतये नमोऽस्तु ॥ १२॥

स्पर्शेन दिव्यमृदुना करनीरजस्य
संवर्धकाय चरणानतभाग्यराशेः ।
सञ्जीवकाय जनकाय च पालकाय
नारायणाय बदरीपतये नमोऽस्तु ॥ १३॥

तेजोमयाय करुणामृतसागराय

निष्कारणाय वरदाय च निस्तुलाय ।
कल्पद्रुमाय सुखदाय निरामयाय
नारायणाय बदरीपतये नमोऽस्तु ॥ १४॥

भोः पाहि पाहि भगवन् शरणागतं माम्
बुद्धिं स्थिरां कुरु सदैव मनः प्रसन्नम् ।
नित्यं मदीय रसनाग्ररसाङ्गणेऽस्मिन्
नारायणाय बदरीपतये नमोऽस्तु ॥ १५॥

इति स्वामी वरदानन्दभारतीविरचितं श्रीवरदनारायण प्रार्थना सम्पूर्णा ।

ॐ श्रीः स्वस्ति ।

भावार्चना (प्राचार्य अ. दा. आठवले)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Eन्चोदेद् अन्द् प्रूफ्रेअद् ब्य् Pरीति Bहन्दरे

*Shri Varadanarayana Prarthana*
pdf was typeset on August 11, 2023

Please send corrections to *sanskrit@cheerful.com*